# सेवा हि परमो धर्मः

## (लोट्लकारस्य प्रयोगः)

एकदा इटालीदेशे युद्धस्य घोरगर्जनं श्रुतम् । अष्ट्रियाफ्रान्सदेशयोः मध्ये महासंग्रामः संघटितः । युद्धे अनेके सैन्याः आहताः च । आहताः सैनिकाः जलं **देहि**, **रक्ष रक्ष** इति चित्कारं कृतवन्तः । तेषाम् आर्त्तनादः मर्मभेदी आसीत् । एतत् करुणं दृश्यं दृष्ट्वा कश्चित् युवव्यवसायी अतीव दुःखितः । पीडितानां प्राणरक्षार्थं स सहसा समीपस्थं पार्वत्यग्रामं गतवान् । ग्राम्ययुवकान् च उक्तवान् - भोः ! **आगच्छत** । आहतानां सेवां **कुरुत**, सैनिकानां प्राणान् **रक्षत** । युवकस्य अनुनयेन ग्राम्ययुवकाः उद्बुद्धाः सेवाकार्यें नियोजिताः । युवकद्वारा तत्रैव आहतसैनिकसेवासंस्था घटिता । सः युवकः आसीत् हेनेरी डुनाण्टः ।

हेनेरी स्विजरलाण्डस्य जेनेभा जनपदे १८२८मिते सम्वत्सरे 'मे' मासस्य अष्टमदिवसे जातः । तस्य माता धार्मिकी, समाजसेविका चासीत् । तया हेनेरी बाल्यात् प्रभावितः । निष्कामसेवा ईश्वरप्राप्तेः सरलः मार्गः इति तस्य धारणा जाता । सः लोकसेवानिमित्तं सेवासंस्थां स्थापितवान् । अधुना सा 'रेड्क्रसनाम्ना' विश्वे परिव्याप्ता । रेड्क्रससंस्थायाः जनकः आसीत् हेनेरी डुनाण्टः ।



विद्यालयेषु कनिष्ठरेड्क्रससंस्था कार्य्यं करोति । रेड्क्रसद्वारा छात्राः सेवाकार्ये प्रवृत्ताः । स्वास्थ्यं, सेवा, सौहार्द्यम् इति रेड्क्रससंस्थायाः लक्ष्यत्रयं भवति । एतेन विश्वशान्तिः सम्भविष्यति । अतः हेनेरी महाभागस्य आह्वानम् आसीत्- सुस्थाः **भवत** । जनसेवां **कुरुत** । समदृष्ट्या **पश्यत**, बन्धुतां **वर्द्धयत** ।

सुमहत्सेवार्थं एषः महामानवः १९०१मिते ख्रीष्टाब्दे नोवेलशान्तिपुरस्कारं प्राप्तवान् । पुरस्कृतराशिं लोकसेवा-निमित्तं समर्पितवान् । निष्कामसेवायाः प्रवर्त्तकः डुनाण्टमहाभागः १९१० ख्रीष्टाब्दे दिवंगतः । तस्य कृतिः- 'मानवसेवा हि माधवसेवा' इति विश्वजनं सततं स्मारयति ।

| |
|---|
| **महासंग्रामः, आर्त्तनादः, अनुनयेन, नियोजिताः, प्रवृत्ताः, सम्भविष्यति, समदृष्ट्या, प्रवर्त्तकः, दिवंगतः कृतिः** |

## टिप्पणी

**शब्दार्थः -**

आर्त्तनादः - पीडितानां करुणस्वरः (କରୁଣ ଚିତ୍କାର), मर्मभेदी - हृदय विदारकः (ହୃଦୟ ବିଦାରକ), उद्बुद्धाः - प्रेरिताः (ଉତ୍ସାହିତ), कनिष्ठरेड्क्रससंस्था - Junior Redcross, सम्वत्सरे - वर्षे (ବର୍ଷରେ), सम्भविष्यति - सम्भवः भविष्यति (ସମ୍ଭବ ହେବ), दिवंगतः - मृतः (ପ୍ରାଣତ୍ୟାଗ କରିଥିଲେ), सततम् - अविरतम् (ସବୁବେଳେ), कृतिः - कार्यम् (କାର୍ଯ୍ୟ) ।

# अभ्यासः

१. उच्चैः पठत, लिखत ।

(क) 'पठ्' धातोः लोट्लकाररूपाणि

| | प्रथमपुरुषः | मध्यमपुरुषः | उत्तमपुरुषः |
|---|---|---|---|
| एकवचनम्- | पठतु | पठ | पठानि |
| द्विवचनम्- | पठताम् | पठतम् | पठाव |
| बहुवचनम्- | पठन्तु | पठत | पठाम |

(ख)

| पुरुषः | एकवचनम् | | द्विवचनम् | | बहुवचनम् | |
|---|---|---|---|---|---|---|
| प्रथमपुरुषः | भवान्/सः | पठतु | भवन्तौ/तौ | पठताम् | भवन्तः / ते | पठन्तु |
| मध्यमपुरुषः | त्वं | पठ | युवां | पठतम् | यूयं | पठत |
| उत्तमपुरुषः | अहं | पठानि | आवां | पठाव | वयं | पठाम |

(ग) पठ् लट्लकारे प्रथमपुरुषे

| | पठ[ति] | | पठ[तः] | | पठ[न्ति] |
|---|---|---|---|---|---|
| लोट्लकारे सः | पठ[तु] | तौ | पठ [ताम्] | ते | पठ[न्तु] |
| | क्रीड[तु] | | क्रीड़[ताम्] | | क्रीड़[न्तु] |
| | पश्य_____ | | पश्य_____ | | पश्य_____ |
| | स्मर_____ | | स्मर_____ | | स्मर_____ |
| | वद_____ | | वद_____ | | वद_____ |

लट्लकारे मध्यमपुरुषे

| | पठ[सि] | | पठ [थः] | | पठ[थ] |
|---|---|---|---|---|---|
| लोट्लकारे त्वं | पठ | युवां | पठ[तम्] | यूयं | पठ[त] |
| | क्रीड़ | | क्रीड़[तम्] | | क्रीड़[त] |
| | पश्य | | पश्यतम् | | पश्यत |
| | स्मर | | स्मर_____ | | स्मर_____ |
| | वद | | वद_____ | | वद_____ |

**लट्लकारे उत्तमपुरुषे**

| | पठा[मि] | | पठा[वः] | | पठा[मः] |
|---|---|---|---|---|---|
| **लोट्लकारे** | पठा[नि] | | पठा[व] | | पठा[म] |
| अहं | क्रीड़ा _____ | आवां | क्रीड़ा_____ | वयं | क्रीड़ा_____ |
| | पश्या_____ | | पश्या_____ | | पश्या_____ |
| | स्मरा णि | | स्मरा_____ | | स्मरा_____ |
| | वदा_____ | | वदा_____ | | वदा_____ |

**(घ) सः गच्छति, त्वं गच्छ ।**

**तथैव लिखत :-**

(i) सः स्मरति, त्वं __________ ।

(ii) भवान् भ्रमति, अहं __________ ।

(iii) अहं पश्यामि, त्वं __________ ।

(iv) वयं क्रीड़ामः, त्वं __________ ।

(v) ते पठन्ति, वयं __________ ।

(vi) त्वं त्यजसि, सः __________ ।

(vii) आवां रक्षामः, युवां __________ ।

(viii) वयं पिबामः, भवन्तः __________ ।

(ix) शिक्षकाः लिखन्ति, छात्राः __________ ।

(x) माता गच्छति, शिशुः __________ ।

२. **योग्यपदेन शून्यस्थानं पूरयत ।**

**यथा :** (क) बालकः पाठं पठतु । (पठ्-लोट्-प्रथमपुरुष-एकवचने)

(ख) त्वं सर्वदा न __________ । (क्रीड्-लोट्-मध्यमपुरुष-एकवचने)

(ग) वयं तत्र __________ । (गम्-लोट्-उत्तमपुरुष-बहुवचने)

(घ) यूयं महापुरुषाणां वचनं __________ । (स्मृ-लोट मध्यमपुरुष-बहुवचने)

(ङ) भवन्तः कदापि मिथ्या मा __________ । (वद्-लोट्-प्रथमपुरुष-बहुवचने)

(च) युवां सर्वदा चलच्चित्रं न __________ । (दृश्-लोट्-मध्यमपुरुष-द्विवचने)

(छ) अहं भवतः उपदेशं __________ । (स्मृ-लोट्-उत्तमपुरुष-एकवचने)

**३. बन्धनीमध्यस्थयथार्थक्रियापदैः शून्यस्थानानि पूरयत ।**

(क) भवान् प्रवचनं __________ ।

(ख) त्वं जलं __________ ।

(ग) ते गृहं __________ ।

(घ) वयं पाठ्यं __________ ।

(ङ) युवां संस्कृतं __________ ।

(च) भवन्तः विद्यालयं __________ ।

(छ) मन्दम् अभ्यासं __________ ।

(ज) सर्वे बन्धुतां __________ ।

(झ) यूयं जनसेवां __________ ।

(ञ) त्वं सुस्थः __________ ।

(आगच्छन्तु, पठाम, वर्द्धयन्तु, पठतम्, भव, शृणोतु, त्यज, देहि, कुरुत, गच्छन्तु)

**४. एकपदेन उत्तरं लिखत ।**

(क) संग्रामे के आहताः ?

(ख) युवकस्य अनुरोधेन के उद्बुद्धाः ?

(ग) ईश्वरप्राप्तेः सुलभः मार्गः कः ?

(घ) हेनेरी डुनाण्टः कदा दिवंगतः ?

(ङ) कः रेड्क्रससंस्थायाः प्रतिष्ठाता ?

**५. बन्धनीमध्यस्थयथार्थपदैः शून्यस्थानानि पूरयत ।**

(क) त्वं जलं __________ । (ददातु, देहि, ददतु)

(ख) सैनिकानां प्राणान् __________ । (रक्षत, रक्षसि, रक्ष)

(ग) आर्त्तनादः मर्मभेदी ___________ । (आसीत्, आस्ताम्, आसन्)

(घ) एका रेड्‌क्रससंस्था ___________ । (घटिता, घटितम्, घटितः)

(ङ) ___________ रेड्‌क्रससंस्थायाः प्रतिष्ठाता । (गोपबन्धुः, हेनेरी, गान्धिजी ।

६. **मातृभाषया अनुवादं कुरुत ।**

(क) युद्धे अनेके सैन्याः आहताः ।

(ख) तेषाम् आर्त्तनादः मर्मभेदी आसीत् ।

(ग) निष्कामसेवा ईश्वरप्राप्तेः सरलः मार्गः ।

(घ) एतेन विश्वशान्तिः सम्भविष्यति ।

(ङ) पुरस्कारराशिं लोकसेवार्थं समर्पितवान् ।

७. **शुद्धशब्दं रचयत ।**

र र्ज घो न ग म्

क्र रे सं ड़ स्था स

वा त स र्पि म न्

वा ष्का से नि म

८. **स्तम्भमेलनं कुरुत ।**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| प्राणान् | कुरुत |
| जनसेवां | धार्मिकी |
| कृतिः | रक्षत |
| सैन्याः | अनुरणिता |
| माता | आहताः |

**९.** **संशोधनं कुरुत ।**

(क) त्वं प्राणान् रक्षतु ।

(ख) तस्य आह्वानम् आसन् ।

(ग) भवन्तः तत्र आगच्छ ।

(घ) आहताः चित्कारं कृतवान् ।

(ङ) अनेकाः सैन्याः मृताः ।

**१०.** **क्रियापदानि विविच्य लिखत ।**

चित्कारः, देहि, एतेन, पश्यताम्, आगच्छत, भवन्तः, प्राप्तवान्, लिखनम्, सैन्याः, आसीत्, वयम्

•